# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (२२)

## १२.११.२०११

# ४०१. पदस्य (८.१.१६)

- अधिकारसूत्रम् ।
- ‘अपदान्तस्य मूर्धन्यः’ (८.३.५५) इत्यतः प्राक् पदाधिकारः ।

# ४०२. पदात् (८.१.१७)

- अधिकारसूत्रम् ।
- ‘कुत्सने च सुप्यगोत्रादौ’ (८.१.६९) सूत्रपर्यन्तम् अधिकारः।

# ४०३. अनुदात्तं सर्वमपादादौ (८.१.१८)

- इत्यधिकृत्य ।
- आपादसमाप्ति अधिकारः । (विभाषितं विशेषवचने - ८.१.७४)

# ४०४. युष्मदस्मदोः षष्ठीचतुर्थी-द्वितीयास्थयोर्वांनावौ (८.१.२०)

- पदत्रयम् । युष्मद्-अस्मदोः, षष्ठी-चतुर्थी-द्वितीयास्थयोः, वां-नावौ ।
- ‘पदस्य’ (८.१.१६), ‘पदात्’ (८.१.१७), ‘अनुदात्तं सर्वमपादादौ’ (८.१.१८) इत्यधिक्रियन्ते ।
- पदात् परयोः अपादादौ स्थितयोः अनयोः षष्ठ्यादिविशिष्टयोः वां नौ इति आदेशौ स्तः । तौ च अनुदात्तौ ।

# ४०५. बहुवचनस्य वस्नसौ (८.१.२१)

- पदद्वयम् । बहुवचनस्य, वस्-नसौ ।
- 'पदस्य' (८.१.१६), 'पदात्' (८.१.१७), 'अनुदात्तं सर्वमपादादौ' (८.१.१८) इत्यधिक्रियन्ते । 'युष्मदस्मदोः षष्ठीचतुर्थी-द्वितीयास्थयोर्वांनावौ' (८.१.२०) इत्यतः 'युष्मदस्मदोः' इति, 'षष्ठीचतुर्थीद्वितीयास्थयोः' इति च अनुवर्तते ।
- उक्तविधयोः अनयोः षष्ठ्यादिबहुवचनान्तयोः वस्नसौ स्तः ।
- वांनावोरपवादः ।

# ४०६. तेमयावेकवचनस्य (८.१.२२)

- पदद्वयम् । ते-मयौ, एकवचनस्य ।
- ‘पदस्य’ (८.१.१६), ‘पदात्’ (८.१.१७), ‘अनुदात्तं सर्वमपादादौ’ (८.१.१८) इत्यधिक्रियन्ते । ‘युष्मदस्मदोः षष्ठीचतुर्थी-द्वितीयास्थयोर्वांनावौ’ (८.१.१२०) इत्यतः ‘युष्मदस्मदोः’ इति, ‘षष्ठीचतुर्थीद्वितीयास्थयोः’ इति च अनुवर्तते ।
- उक्तविधयोः अनयोः षष्ठीचतुर्थ्येकवचनान्तयोः ते मे एतौ स्तः ।

# ४०७. त्वामौ द्वितीयायाः (८.१.२३)

- पदद्वयम् । त्वा-मौ, द्वितीयायाः ।
- 'पदस्य' (८.१.१६), 'पदात्' (८.१.१७), 'अनुदात्तं सर्वमपादादौ' (८.१.१८) इत्यधिक्रियन्ते । 'युष्मदस्मदोः षष्ठीचतुर्थी-द्वितीयास्थयोर्वांनावौ' (८.१.१२०) इत्यतः 'युष्मदस्मदोः' इति, 'तेमयावेकवचनस्य' (८.१.२२) इत्यतः 'एकवचनस्य' इति च अनुवर्तते ।
- द्वितीयैकवचनान्तयोः त्वा मा एतौ स्तः ।

- द्वितीया - त्वाम्/त्वा युवाम्/वाम् युष्मान्/वः
- चतुर्थी - तुभ्यम्/ते युवाभ्याम्/वाम् युष्मभ्यम्/वः
- षष्ठी - तव / ते युवयोः/वाम् युष्माकम्/वः

- श्रीशस्त्वावतु मापीह दत्ता ते मेऽपि शर्म सः ।
- स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः ॥
- सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः ।
- सोऽव्याद्वो नः शिवं वो नो दद्यात् सेव्योऽत्र वः स नः ॥

- पदात् परयोः किम्?
- वाक्यादौ मा भूत्, त्वां पातु, मां पातु ।

- अपादादौ किम्?
- वेदैरशेषैः संवेद्योऽस्मान्कृष्णः सर्वदाऽवतु ।

- स्थग्रहणात् श्रूयमाणविभक्तिकयोरेव ।
- नेह - इति युष्मत्पुत्रो ब्रवीति, इत्यस्मत्पुत्रो ब्रवीति ।

- ‘समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः’ (वा)
- ‘एकतिङ् वाक्यम्’ (वा)
- तेनेह न - ओदनं पच, तव भविष्यति ।
- इह तु स्यादेव - शालीनां ते ओदनं दास्यामि इति ।

- ‘एते वांनावादय आदेशाः अनन्वादेशे वा वक्तव्याः’ (वा) ।
- अन्वादेशे तु नित्यं स्युः ।
- किञ्चित् कार्यं विधातुम् उपात्तस्य कार्यान्तरं बोधयितुं पुनरुपादानम् अन्वादेशः ।
- धाता ते भक्तोऽस्ति, धाता तव भक्तोऽस्तीति वा ।
- तस्मै ते नम इत्येव ।
- ’योऽग्निर्हव्यवाट्, य इन्द्रो वज्रबाहुः’ इत्यादि पूर्ववाक्यम् ।

# ४०८. न चवाहाहैवयुक्ते (८.१.२४)

- पदद्वयम् । न, च-वा-हा-अह-एव-युक्ते ।
- चादिपञ्चकयोगे नैते आदेशाः स्युः ।
- च इति समुच्चये । वा इति विकल्पे । हा इत्यद्भुते । अह इति खेदे । एव इति अवधारणे ।
- हरिस्त्वां मां च रक्षतु ।
- कथं त्वां मां वा न रक्षेद् इत्यादि ।
- युक्तग्रहणात् साक्षाद्योगेऽयं निषेधः ।
- परम्परासम्बन्धे तु आदेशः स्यादेव ।
- हरो हरिश्च मे स्वामी ।

# ४०९. पश्यार्थैश्चानालोचने (८.१.२५)

- पदत्रयम् । पश्यार्थैः, च, अनालोचने ।
- 'न चवाहाहैवयुक्ते' (८.१.२४) इत्यतः 'न' इति अनुवर्तते ।
- अचाक्षुषज्ञानार्थैः धातुभिः योगे एते आदेशाः न स्युः ।
- चेतसा त्वां समीक्षते ।
- परम्परासम्बन्धेऽप्ययं निषेधः ।
- भक्तस्तव रूपं ध्यायति ।

- आलोचने तु भक्तस्त्वा पश्यति चक्षुषा ।